Harald Wiese[1]

# उपकार-धर्मदानयोर्भेदसाधारण्यौ

## १. प्रबन्धस्याभिप्रायः

एतस्मिन् मम प्रबन्ध उपदेशद्वयस्य तुलना कर्तव्या । भारतमण्डले धर्मदानोपदेशो रोमकसाम्राज्ये तूपकारशास्त्रम् उपदिष्टम् । ब्राह्मणरचितधर्मशास्त्रेषु प्रधानविषयो धर्मदानम् । लक्ष्मीधरस्य दानकाण्डे[2] देवलेनोक्तम्

[1] University of Leipzig, Postfach 920, D-04009 Leipzig, Germany, tel.: 49 341 97 33 771, e-mail: wiese@wifa.uni-leipzig.de

मह्यं सदानन्ददासः बहूपकारानकरोत् । तत्कृते कृतज्ञो ऽस्मि

[2] लक्ष्मीधररचितस्य कृत्यकल्पतरुनामनिबन्धस्य दानकाण्डे (DK) दानस्वरूपदेयादेयपात्रापात्रलक्षणादयो वर्णिताः । द्र. David Brick. *Brahmanical*

नाल्पत्वं वा बहुत्वं वा दानस्याभ्युदयावहम् ।

श्रद्धा शक्तिश्च दानानां वृद्धिक्षयकरे हि ते ॥ (DK 1.3)

इति धर्मशास्त्रेषु द्विहेतुधर्मदानम् अवगतम् । अभ्युदयार्थं श्रद्धा च शक्तिश्च[3] आवश्यक्यौ । तावुभौ हेतू मया निर्वक्तव्यौ । एतयोर्निर्वचनं मम प्रबन्धस्य प्रथमो ऽभिप्रायः । प्रबन्धस्योपकार-धर्मदानयोस्तुलना द्वितीयो ऽभिप्रायः । उपकारशब्दार्थः केनचिद् रोमकेन तर्कविदा व्यादिष्टः । तथा हि –

रोमकसाम्राज्ये पुराणकाले साधारणयुगात् पश्चात् प्रथमशताब्दे सेनेकनामको (Seneca)[4] महान् विद्वानासीत् । स चोपकारविषय (de beneficiis)[5] इति शास्त्रस्यान्यासांच तर्कविद्यानां प्रसिद्धः प्रवक्ता । अस्मिन् उपकारशास्त्रे महामनास्तर्कविद् आह

*beneficium non in eo, quod fit aut datur, consistit, sed in ipso dantis aut facientis animo* (BEN 1.6.1)

न करणदानद्वयम् उपकारलक्षणं किन्तु ददतश्च कुर्वतश्च विधित्सैव ।

---

*Theories of the Gift.* Cambridge (MA): 2015, p. 260 । कृत्यकल्पतराविव निबन्धेषु बहूनां प्रवक्तॄणां वचनानि यथाविषयं समाहितानि ।

[3] सुबोधार्थम् अत्रान्यत्र च सन्धिरनादृतः

[4] सेनेको दुष्कीर्तेः नेरोनामशासकस्य (Nero) गुरुश्चामात्यो ऽभवत् । किन्त्वसौ क्रूरशासको गुरुभक्तिं गुरुकृतज्ञत्वं वा नाचरत् ।

[5] सेनेकरचिते de beneficiis (BEN) इति शास्त्र उपकारस्वरूपकृतज्ञत्वादयो वर्णिताः । द्र. L. Annaeus Seneca. *De clementia, de beneficiis.* Darmstadt: 1999.

विधित्सेत्यनुजिघृक्षा । यद्यन्योऽन्यस्योपकारकस्तर्हि मित्रं मित्रायोपकारे वर्तते । स मैत्र्यसम्बन्धः साहचर्यसम्बन्धो वा भवति । आदातुः प्रतिदानं प्रत्युपकारं वा नावश्यकम् । किन्तु आदातृकृतज्ञत्वम् आवश्यकम् इति सेनेकप्रोक्तम् ।

उपकार-धर्मदानयोः साधारण्यानि सन्ति । भेदा अपि सन्ति । तस्मिन् प्रसङ्गे वक्ष्यामि । लक्ष्मीधरकृते दानकाण्डे

> दानस्वरूपमाचष्टे देयादेयविवेचनम् ।
> पात्राणां लक्षणं सम्यक् महादानानि षोडश ॥ (DK 0.2)

इति पठामः । अर्थानां सद्गृहीतृषु श्रद्धया शक्तितश्च देयमिति धर्मदानस्वरूपम् । देयादेयविषया शक्तिः । पात्रमिति सद्गृहीता । मयाधुना अर्थदान-धर्मदान-उपकार-भेदाः श्रद्धा शक्तिः पात्रं साहचर्यं चेति पृथग्विषयाः कथयिष्यन्ते ।

# २. नार्थदानं धर्मदानम् । नार्थदानम् उपकारः

यद्विक्रेता क्रेत्रे ददाति तदर्थदानमुच्यते दानग्रहणं वा । ददामि ददासि यथेति[6] विक्रेतृगणनम् । ततो देवलेन

पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम् ।
केवलं त्यागबुद्ध्या यद्धर्मदानं तदुच्यते ॥
प्रयोजनमपेक्ष्यैव प्रसङ्गाद्यत्प्रदीयते ।
तदर्थदानमित्याहुरैहिकं फलहेतुकम् ॥ (DK 1.5-6)

इत्यर्थदानधर्मदानभेद उक्तः । लौकिकप्रयोजनं फलहेतुकमर्थदानम् । अफलहेतुकं लौकिकप्रयोनवर्जं पुण्यप्रयोजनं धर्मदानम् ।

यथार्थदानं न धर्मदानं तथार्थदानं नोपकारः । नेरोगुरुरोमकतर्कविद् आह

> *Beneficiorum simplex ratio est: tantum erogatur; si reddet aliquid, lucrum est, si non reddet, damnum non est. Ego illut dedi, ut darem.* (BEN 1.2.3)
>
> उपकाराणां सहजतया गणनं भवति । किंचिद् उपकारिणा दत्तम् । यद्यादात्रा किंचित् प्रतिदत्तं भवेत् तर्हि दाता फलमाप्नोति ।

---

[6] द्र. रोमकभाषायां do ut des इति quid pro quo इति वा ।

> यद्यादात्रा न किंचित् प्रतिदत्तं भवेत् तर्ह्यर्थलोपो न भवेत् । अहमदो
> वस्तु दानार्थम् एवाददामित्युपकारकश्चिन्तयति ।

इति । अत्रोपकार-धर्मदान-साधारण्यं प्रतिवीक्ष्यताम् । दानार्थम् एवेति च (BEN 1.2.3) केवलं त्यागबुद्ध्येति च (DK 1.5) संगच्छतः ।

# ३. श्रद्धाशब्दस्य प्रथमो ऽर्थः

श्रद्धया दद्यादिति धर्मशास्त्रेषूच्यते । द्व्यर्था श्रद्धा ।[7] श्रद्धानाम प्रमोदमहात्यागबुद्धिरिति प्रथमो ऽर्थः । श्रद्धानाम दानपुण्यलाभनिश्चय इति द्वितीयो ऽर्थः ।[8] श्रद्धाशब्दार्थस्य प्रथमो ऽर्थ इत्थमनूद्यते

> सौमुख्याद्यभिसंप्रीतिरर्थिनां दर्शने सदा ।
> सत्कृतिश्चानसूया च तदा श्रद्धेति कीर्त्यते ॥ (DK 1.14)

प्रमोदी सुखमुखो धर्मदाता सत्कारानसूयाभ्यां दद्यादिति धर्मविद्भिरुच्यते । तथा रोमकतर्कवित्

[7] द्र. Hans-Werbin Köhler. *Śrad-dhā* in der Vedischen und Altbuddhistischen Literatur. Wiesbaden: 1973.

[8] द्र. वर्गम् ६

*Gratus adversus eum esse quisquam potest, qui beneficium aut superbe abiecit aut iratus inpegit aut fatigatus, ut molestia careret, dedit?* (BEN 1.1.7)

यो ऽभिमानेनोपकारमवाक्षिपत् क्रोधेन वाभ्यनुदत् श्रमेण वा पीडननिवारणार्थमददात्तस्मिन्नरे कः कृतज्ञो भवेत् ?

इति पृच्छति । अभिमानात् क्रोधाच्छ्रमाद् वा कृतघ्नत्वं सम्भवति । ततः प्रमोदी सुखमुख उपकारको दद्यादिति रोमकधर्मविद्भिरपि प्रार्थ्यते ।

# ४. शक्तिः

याज्ञवल्क्यस्मृतौ

स्वकुटुम्बाविरोधेन देयं दारसुतादृते ।
नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम् ॥ (DK 2.5)

इत्यावेदितम् । सुपुण्यदं धर्मदानम् अत्र न संशयः । किन्तु दानात्यायो नास्ति । स्वकुले दुःखजीविनि स्वजनविरोधपरजनदानं धर्मप्रतिरूपको मिथ्याचार इति मानवधर्मशास्त्रम् । ततः परं भार्या पुत्राः पुत्र्यो वा न देयाः । यद्यन्वयः कुलो ऽस्ति तर्हि किंचित् केवलं देयं न सर्वस्वम् । अन्ततो न्यासनिक्षेपादयो ऽनर्हद्भ्यो न देयाः ।

शक्तितो दद्यादिति धर्मशास्त्रविधिः । रोमकपण्डितेनापि

> *Respiciendae sunt cuique facultates suae uiresque, ne aut plus praestemus, quam possumus, aut minus* (BEN 2.15.3)
>
> स्वशक्यत्वशक्तयश्चिन्त्यन्ताम् । यच्छक्नुमस्तत् करवाम । नोत्तरं न्यूनं वा ।

इति अनूद्यते । शक्तिविषय अप्युपकार-धर्मदान-साधारण्यम् ।

# ५. पात्रम्

बहव उपकारदोषाः सन्त्यपात्रवरणं विशेषत इति रोमकतत्त्ववित् प्राह ।[9]

> *nomina facturi diligenter in patrimonium et uitam debitoris inquirimus, semina in solum effetum et sterile non spargimus: beneficia sine ullo dilectu magis proicimus quam damus* (BEN 1.1.2)
>
> यथा बीजानि क्लान्तजङ्गलभूम्यां न वपामस्तथर्णदानार्थम् ऋणिकधनचरिते प्रयत्नेन परीक्षामहे । उपकारान्तु विना प्रयत्नमवक्षिपाम एव । न सम्यग् दद्मः ।

---

[9] BEN 1.1.2: non eligimus dignos, quibus tribuamus

इत्याचारतार्किक ऋणोपकारतुलनां करोति । तथा धर्मविद्भिः सुपात्राणि बहुशः शंसितानि ।

विद्यायुक्तो धर्मशीलः प्रशान्तः क्षान्तो दान्तः सत्यवादी कृतज्ञः ।
वृत्तिग्लानो गोहितो गोशरण्यो दाता यज्वा ब्राह्मणः पात्रमाहुः ॥
(DK 3.7)

इति यमेन प्रोक्तम् ।

किंचिद्वेदमयं पात्रं किंचित्पात्रं तपोमयम् ।
पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे ॥ (DK 3.14)

इति वसिष्ठेन प्रतिपादितम् । महाभारते

साङ्गांस्तु चतुरो वेदान्यो ऽधीते वै द्विजर्षभः ।
षड्भ्यो ऽनिवृत्तः कर्मभ्यस्तं पात्रमृषयो विदुः ॥ (DK 3.13)

इति । एतस्मिञ्श्लोक अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहा इति ब्राह्मणषड्कर्माणि । गुरुर्मातापितरौ मित्रं दीन उपकारी वेति अन्यानि पात्राणि ।[10]

[10] DK 3.80

# ६. श्रद्धाशब्दस्य द्वितीयो ऽर्थः

पुण्यप्रयोजनं धर्मदानम् ।[11] पात्रप्रतिबद्धं दातृपुण्यम् ।

व्यसनापदृणार्थं च कुटुम्बार्थं च याचते ।
एवमन्विष्य दातव्यं सर्वदानेष्वयं विधिः ॥
मातापितृविहीनं तु संस्कारोद्वाहनादिभिः ।
यः स्थापयति तस्येह पुण्यसंख्या न विद्यते ॥ (DK 3.63-64)

इति दक्षेण प्रोक्तम् । व्यसनार्ताय वापत्क्लिष्टाय वर्णिकाय वा धर्मविद् दद्यात् । यश्छेमण्डाय संस्कारोपकारं करोति स महापुण्यं लभते । तथा पात्रवर्णप्रतिबद्धं[12] ब्राह्मणविशेषप्रतिबद्धं[13] वा पुण्यमस्ति ।

किन्तु पुण्यदं वस्तुतो धर्मदानमिति प्रश्नः । दातुर्दानपुण्यश्रद्धास्ति ? प्रायश आस्तिक्यबुद्धिः श्रद्धा । धर्मदानविषय एव दानपुण्यनिश्चयः श्रद्धा ।[14] यस्य श्रद्धा पुण्यनिश्चयो ऽस्ति स श्रद्धया प्रमोदमहात्यागबुद्ध्या[15] ददाति ।

---

[11] द्र. वर्गम् २
[12] DK 3.60
[13] DK 3.61
[14] द्र. David Brick. *Brahmanical Theories of the Gift*, p. 55.
[15] द्र. वर्गम् ३

श्रद्धाशब्दस्य द्वितीयो ऽर्थः रोमकोपकारधर्मे नास्ति । तथोपकारस्य साहचर्यं ब्राह्मणदानधर्मे नास्ति ।

# ७. साहचर्यहेतुक उपकारः

धर्मदानेभ्यः पुण्यं सम्भवति । उपकारेभ्यश्च साहचर्यं सम्भवति मैत्र्यम् वा । ब्राह्मणधर्मशास्त्रे पात्रविशेषप्रतिबद्धं दातृपुण्यम् । रोमकोपकारशास्त्रे कृतज्ञत्वप्रतिबद्धम् उपकारफलभागः । कृतघ्नत्वपापं त्वनिष्टं भवति ।

> *nihil aeque concordiam humani generis dissociat ac distrahit quam hoc uitium. Nam quo alio tuto sumus, quam quod mutuis iuuamur officiis? hoc uno instructior uita contraque incursiones subitas munitior est, beneficiorum commercio. Fac nos singulos, quid sumus? praeda animalium ... Duas res deus dedit, quae illum obnoxium ualidissimum facerent, rationem et societatem* (BEN 4.18.1-2)
>
> तत् पापमेव विश्वजनस्य साहचर्यं भिनत्ति छिनत्ति च । उपकारैः परस्परं ह्युपकृत्य वयमभयं वर्तामहे । केनान्येन ? उपकारप्रत्युपकारा एव जीवितं सबलीकुर्वन्ति चाकस्मिकाभिक्रमेभ्यश्च रक्षन्ति । एकत्वेन वयं किं स्याम ?

भक्ष्यमेव हिंस्रपशूनाम् ... । भीतिमते दृढीकर्तुम बोधसाहचर्ये ददावीश्वरः ।

इति सेनेकेन साहचर्यस्य शुभफलानि प्रतिपादितानि ।

लौकिकप्रयोजनः फलोपलिप्सो रोमकोपकारधर्म इति चेन् नेति सेनेकः । धर्मत एव उपकारान् कुर्यात् । तथा धर्मतः प्रशान्तः क्षान्तो दान्तः स्यात् । फलवदपि कर्म धर्मत एव सम्पादयामि न फलतः ।[16]

अफलोपलिप्सस्तथा ब्राह्मणदानधर्मः । पुण्यप्रयोजनो यद्यपि दानधर्मो ऽस्ति तथापि लौकिकफलानि सन्ति । यस्माद् ब्राह्मणा बहुशताब्दान् धर्मदानान्यलभन्त तस्मात् ते शास्त्ररचनाध्ययनाध्यापनानि कर्तुमशक्नुवन् । ततो भारतभूकण्डे पाश्चात्यभूकण्डे ऽप्येतानि क्रतुमन्त्यद्भुतरूपाणि विश्वजनसाहचर्यकराणि रमणीयानि शास्त्राणि विश्वजनैः पठितव्यानीति मन्ये ॥

[16] द्र. BEN 4.20.1: prodest gratum esse: ero tamen gratus, etiam si nocet. (सार्थकं कृतज्ञत्वम् । किन्तु यद्यपि कृतज्ञत्वमनर्थकं भवेत् कृतज्ञस्तथापि स्याम्)